॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ९

अवधूय च तां बुद्धिं बभूवावस्थितस्तदा ।
जगाम चापरां चिन्तां सीतां प्रति महाकपिः ॥१॥

न रामेण वियुक्ता सा स्वप्तुमर्हति भामिनी ।
न भोक्तुं नाप्यलङ्कर्तुं न पानमुपसेवितुम् ॥२॥

नान्यं नरमुपस्थातुं सुराणामपि चेश्वरम् ।
न हि रामसमः कश्चिद्विद्यते त्रिदशेष्वपि ।
अन्येयमिति निश्चित्य पानभूमौ चचार सः ॥३॥

क्रीडितेनापराः क्लान्ता गीतेन च तथा पराः ।
नृत्तेन चापराः क्लान्ताः पानविप्रहतास्तथा ॥४॥

मुरजेषु मृदङ्गेषु पीठिकासु च संस्थिताः ।
तथास्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः ॥५॥

अङ्गनानां सहस्रेण भूषितेन विभूषणैः ।
रूपसंलापशीलेन युक्तगीतार्थभाषिणा ॥६॥

देशकालाभियुक्तेन युक्तवाक्याभिधायिना ।
रताभिरतसंसुप्तं ददर्श हरियूथपः ॥७॥

तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः ।
गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः ॥८॥

स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयम् ।
करेणुभिर्यथारण्यं परिकीर्णो महाद्विपः ॥९॥

सर्वकामैरुपेतां च पानभूमिं महात्मनः ।
ददर्श कपिशार्दूलस्तस्य रक्षःपतेर्गृहे ॥१०॥

मृगाणां महिषाणां च वराहाणां च भागशः ।
तत्र न्यस्तानि मांसानि पानभूमौ ददर्श सः ॥११॥

रौक्मेषु च विशलेषु भाजनेष्वर्धभक्षितान् ।
ददर्श कपिशार्दूल मयूरान्कुक्कुटांस्तथा ॥१२॥

वराहवार्ध्राणसकान्दधिसौवर्चलायुतान् ।
शल्यान्मृगमयूरांश्च हनूमानन्ववैक्षत ॥१३॥

कृकरान्विविधान्सिद्धांश्चकोरानर्धभक्षितान् ।
महिषानेकशल्यांश्च छागांश्च कृतनिष्ठितान् ।
लेह्यमुच्चावचं पेयं भोज्यानि विविधानि च ॥१४॥

तथाम्ललवणोत्तंसैर्विविधै रागषाडवैः ।
हार नूपुरकेयूरैरपविद्धैर्महाधनैः ॥१५॥

पानभाजनविक्षिप्तैः फलैश् च विविधैरपि ।
कृतपुष्पोपहारा भूरधिकं पुष्यति श्रियम् ॥१६॥

तत्र तत्र च विन्यस्तैः सुश्लिष्टैः शयनासनैः ।
पानभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते ॥१७॥

बहुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः ।
मांसैः कुशलसंयुक्तैः पानभूमिगतैः पृथक् ॥१८॥

दिव्याः प्रसन्ना विविधाः सुराः कृतसुरा अपि ।
शर्करासवमाध्वीकाः पुष्पासवफलासवाः ।
वासचूर्णैश्च विविधैर्मृष्टास्तैस्तैः पृथक्पृथक् ॥१९॥

सन्तता शुशुभे भूमिर्माल्यैश्च बहुसंस्थितैः ।
हिरण्मयैश्च करकैर्भाजनैः स्फाटिकैरपि ।
जाम्बूनदमयैश्चान्यैः करकैरभिसंवृता ॥२०॥

राजतेषु च कुम्भेषु जाम्बूनदमयेषु च ।
पानश्रेष्ठं तदा भूरि कपिस्तत्र ददर्श ह ॥२१॥

सोऽपश्यच्छातकुम्भानि शीधोर्मणिमयानि च ।
राजतानि च पूर्णानि भाजनानि महाकपिः ॥२२॥

क्व चिदर्धावशेषाणि क्व चित्पीतानि सर्वशः ।
क्व चिन्नैव प्रपीतानि पानानि स ददर्श ह ॥२३॥

क्व चिद्भक्ष्यांश्च विविधान्क्व चित्पानानि भागशः ।
क्व चिदन्नावशेषाणि पश्यन्वै विचचार ह ॥२४॥

क्व चित्प्रभिन्नैः करकैः क्व चिदालोडितैर्घटैः ।

क्व चित्सम्पृक्तमाल्यानि जलानि च फलानि च ॥ २५ ॥

शयनान्यत्र नारीणां शून्यानि बहुधा पुनः ।
परस्परं समाश्लिष्य काश्चित्सुप्ता वराङ्गनाः ॥ २६ ॥

का चिच्च वस्त्रमन्यस्या अपहृत्योपगुह्य च ।
उपगम्याबला सुप्ता निद्राबलपराजिता ॥ २७ ॥

तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजम् ।
नात्यर्थं स्पन्दते चित्रं प्राप्य मन्दमिवानिलम् ॥ २८ ॥

चन्दनस्य च शीतस्य शीधोर्मधुरसस्य च ।
विविधस्य च माल्यस्य पुष्पस्य विविधस्य च ॥ २९ ॥

बहुधा मारुतस्तत्र गन्धं विविधमुद्वहन् ।
स्नानानां चन्दनानां च धूपानां चैव मूर्च्छितः ।
प्रववौ सुरभिर्गन्धो विमाने पुष्पके तदा ॥ ३० ॥

श्यामावदातास्तत्रान्याः काश्चित्कृष्णा वराङ्गनाः ।
काश्चित्काञ्चनवर्णाङ्ग्यः प्रमदा राक्षसालये ॥ ३१ ॥

तासां निद्रावशत्वाच्च मदनेन विमूर्च्छितम् ।
पद्मिनीनां प्रसुप्तानां रूपमासीद्यथैव हि ॥ ३२ ॥

एवं सर्वमशेषेण रावणान्तःपुरं कपिः ।
ददर्श सुमहातेजा न ददर्श च जानकीम् ॥ ३३ ॥

निरीक्षमाणश्च ततस्ताः स्त्रियः स महाकपिः ।
जगाम महतीं चिन्तां धर्मसाध्वसशङ्कितः ॥ ३४ ॥

परदारावरोधस्य प्रसुप्तस्य निरीक्षणम् ।
इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ॥ ३५ ॥

न हि मे परदाराणां दृष्टिर्विषयवर्तिनी ।
अयं चात्र मया दृष्टः परदारपरिग्रहः ॥ ३६ ॥

तस्य प्रादुरभूच्चिन्तापुनरन्या मनस्विनः ।
निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनी ॥ ३७ ॥

कामं दृष्ट्वा मया सर्वा विश्वस्ता रावणस्त्रियः ।
न तु मे मनसः किं चिद्वैकृत्यमुपपद्यते ॥ ३८ ॥

मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तते ।
शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥ ३९ ॥

नान्यत्र हि मया शक्या वैदेही परिमार्गितुम् ।
स्त्रियो हि स्त्रीषु दृश्यन्ते सदा सम्परिमार्गणे ॥ ४० ॥

यस्य सत्त्वस्य या योनिस्तस्यां तत्परिमार्ग्यते ।
न शक्यं प्रमदा नष्टा मृगीषु परिमार्गितुम् ॥ ४१ ॥

तदिदं मार्गितं तावच्छुद्धेन मनसा मया ।
रावणान्तःपुरं सरं दृश्यते न च जानकी ॥ ४२ ॥

देवगन्धर्वकन्याश्च नागकन्याश्च वीर्यवान् ।
अवेक्षमाणो हनुमान्नैवापश्यत जानकीम् ॥ ४३ ॥

तामपश्यन्कपिस्तत्र पश्यंश्चान्या वरस्त्रियः ।
अपक्रम्य तदा वीरः प्रध्यातुमुपचक्रमे ॥ ४४ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com